श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्री गोदाष्टोत्तरशतनामस्तोत्रम् ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

## श्री रङ्गरामानुज महादेशिकन्

*His Holiness  śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्री गोदाष्टोत्तरशतनामस्तोत्रम् ॥

शतमखमणि नीला चारुकल्हारहस्ता
    स्तनभरनमिताङ्गी सान्द्रवात्सल्यसिन्धुः।
अलकविनिहिताभिः स्रग्भिराकृष्टनाथा
    विलसतु हृदि गोदा विष्णुचित्तात्मजा नः॥

श्रीरङ्गनायकी गोदा विष्णुचित्तात्मजा सती।
गोपीवेषधरा देवी भूसुता भोगशालिनी॥ 1 ॥

तुलसीकाननोद्भूता श्रीधन्विपुरवासिनी।
भट्टनाथप्रियकरी श्रीकृष्णहितभोगिनी॥ 2 ॥

आमुक्तमाल्यदा बाला रङ्गनाथप्रिया परा।
विश्वम्भरा कलालापा यतिराजसहोदरी॥ 3 ॥

कृष्णानुरक्ता सुभगा सुलभश्रीः सुलक्षणा।
लक्ष्मीप्रियसखी श्यामा दयाञ्चितदृगञ्चला॥ 4 ॥

फल्गुन्याविर्भवा रम्या धनुर्मासकृतव्रता।
चम्पकाशोकपुन्नागमालतीविलसत्कचा॥ 5 ॥

आकारत्रयसम्पन्ना नारायणपदाश्रिता।
श्रीमदष्टाक्षरीमन्त्रराजस्थितमनोरथा॥ 6 ॥

मोक्षप्रदाननिपुणा मनुरत्नाधिदेवता।
ब्रह्मण्या लोकजननी लीलामानुषरूपिणी॥ 7 ॥

ब्रह्मज्ञानप्रदा माया सच्चिदानन्दविग्रहा।
महापतिव्रता विष्णुगुणकीर्तनलोलुपा ॥ **8** ॥

प्रपन्नार्तिहरा नित्या वेदसौधविहारिणी।
श्रीरङ्गनाथमाणिक्यमञ्जरी मञ्जुभाषिणी ॥ **9** ॥

पद्मप्रिया पद्महस्ता वेदान्तद्वयबोधिनी।
सुप्रसन्ना भगवती श्रीजनार्दनदीपिका ॥ **10** ॥

सुगन्धावयवा चारुरङ्गमङ्गलदीपिका।
ध्वजवज्राङ्कुशाब्जाङ्कमृदुपादलताञ्चिता ॥ **11** ॥

तारकाकारनखरा प्रवालमृदुलाङ्गुली।
कूर्मोपमेयपादोर्ध्वभागा शोभनपार्ष्णिका ॥ **12** ॥

वेदार्थभावतत्त्वज्ञा लोकाराध्याङ्घ्रिपङ्कजा।
आनन्दबुद्बुदाकारसुगुल्फा परमाऽणुका ॥ **13** ॥

तेजःश्रियोज्ज्वलधृतपादाङ्गुलिसुभूषिता।
मीनकेतनतूणीरचारुजङ्घाविराजिता ॥ **14** ॥

ककुद्वज्जानुयुग्माढ्या स्वर्णरम्भाभसक्थिका।
विशालजघना पीनसुश्रोणी मणिमेखला ॥ **15** ॥

आनन्दसागरावर्तगम्भीराम्भोजनाभिका।
भास्वद्वलित्रिका चारुजगत्पूर्णमहोदरी ॥ **16** ॥

नववल्लीरोमराजी सुधाकुम्भायितस्तनी।
कल्पमालानिभभुजा चन्द्रखण्डनखाञ्चिता ॥ **17** ॥

सुप्रवाशाङ्गुलीन्यस्तमहारत्नाङ्गुलीयका।
नवारुणप्रवालाभपाणिदेशसमञ्चिता ॥ **18** ॥

कम्बुकण्ठी सुचुबुका बिम्बोष्ठी कुन्ददन्तयुक्।
कारुण्यरसनिष्यन्दनेत्रद्वयसुशोभिता॥ **19** ॥

मुक्ताशुचिस्मिता चारुचाम्पेयनिभनासिका।
दर्पणाकारविपुलकपोलद्वितयाञ्चिता॥ **20** ॥

अनन्तार्कप्रकाशोद्यन्मणिताटङ्कशोभिता।
कोटिसूर्याग्निसङ्काशनानाभूषणभूषिता॥ **21** ॥

सुगन्धवदना सुभ्रू अर्धचन्द्रललाटिका।
पूर्णचन्द्रानना नीलकुटिलालकशोभिता॥ **22** ॥

सौन्दर्यसीमा विलसत्कस्तूरीतिलकोज्ज्वला।
धगद्धगायमानोद्यन्मणिसीमन्तभूषणा॥ **23** ॥

जाज्वल्यमानसद्रत्नदिव्यचूडावतंसका।
सूर्याधचन्द्रविलसत् भूषणाञ्चितवेणिका॥ **24** ॥

अत्यर्कानलतेजोधिमणिकञ्चुकधारिणी।
सद्रत्नाञ्चितविद्योतविद्युत्कुञ्जाभशाटिका॥ **25** ॥

नानामणिगणाकीर्णहेमाङ्गदसुभूषिता।
कुङ्कुमागरुकस्तूरीदिव्यचन्दनचर्चिता॥ **26** ॥

स्वोचितौज्ज्वल्यविविधविचित्रमणिहारिणी।
असङ्ख्येयसुखस्पर्शसर्वातिशयभूषणा॥ **27** ॥

मल्लिकापारिजातादिदिव्यपुष्पस्रगञ्चिता।
श्रीरङ्गनिलया पूज्या दिव्यदेशसुशोभिता॥ **28** ॥

॥ इति श्री गोदाष्टोत्तरशतनामस्तोत्रं समाप्तम्॥